अष्टतयी । अवयवमात्रे तयप् । २अष्टसंख्यायां न० ।

**अष्टतारिणी** स्त्री ब०व० कर्म० संज्ञात्वान्न द्विगुः । "तारा चोग्रा महोग्रा च वज्रा काली सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिण्योमता" इत्युक्तासु तारादिषु अष्टसु तारिणीरूपदेवीमूर्त्तिषु ।

**अष्टत्रिक** न० अष्टाहत्तं त्रिकम् । १चतुर्विंशतिसंख्यायां तत्२संख्याते च "वैश्यस्याष्टत्रिकाद्वर्दात् सावित्रीपतनं भवेत्" मार्कण्डेय पु० । "अष्टत्रिकाच्चतुर्विंशतेः" म०त०रघु० ।

**अष्टत्व** न० अष्टनां भावः त्व । अष्टसंख्यायाम् ।

**अष्टदंष्ट्र** पु० दैत्य० दानवभेदे "अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादो जलन्धमः" हरि० २२९ अ० ।

**अष्टदल** न० अष्टौ दलानि यस्य । अष्टपत्रककमले "लिखेदष्टदलं पद्मं भूद्वत्तत्रिकभूषितम्" तन्त्रम् ।

**अष्टदिश्** स्त्री ब०व० । कर्म० संज्ञत्वात् द्विगुः । पूर्व्वाग्नेयदक्षिणनैर्ऋतपश्चिमवायव्योत्तरैशानीरूपासु अष्टसु दिक्षु । 'इन्द्रादीन् लोकपालांश्च अष्टदिक्षु च पूजयेत्" तन्त्रम् ।

**अष्टदिक्करिणी** स्त्री ब०व० अष्टदिक्स्थाः करिण्यः ।"करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावतीत्युक्तासु ऐरावतादीनां प्रियासु अष्टसु हस्तिनीषु इत्यमरः ।

**अष्टदिक्पाल** पु० अष्टौ दिशःपालयन्ति पा-णिच्-अण् उप०स० । "इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानरूपेषु अष्टसु दिक्पालेषु ।

**अष्टदिग्गज** पु० ब०व० अष्टदिक्स्था गजाः । "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजा" इत्युक्तेषु अष्टसु दिक्स्थे ऐरावतादिषु गजेषु एतत्संख्यासाम्याद्गजशब्दस्याष्टसंख्यार्थकत्वम् ।

**अष्टद्रव्य** न० ब०व० कर्मधा० संज्ञात्वान्न द्विगुः । "अश्वत्थोडुम्बरप्लक्षन्यग्रोधसमिधस्तिलाः । सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधा" इत्युक्तेषु होमसाधनेषु अष्टसु द्रव्येषु । "त्रिस्वादुयुक्तैर्जुहुयाच्चाष्टद्रव्यैर्दशांशतः" तन्त्रसा० ।

**अष्टधा** अव्य० अष्टन्+प्रकारे धाच् । अष्टप्रकारे "भिन्नप्रकृतिरष्टधा" गीता । "सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः" रघुः ।

**अष्टधातु** पु० ब०व० अष्टौ धातवः कर्म्म० संज्ञात्वान्न द्विगुः । "स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशदमेव च । शीसं लौहं रसश्चेतिधातवोऽष्टौ प्रकीर्त्तिता" इत्युक्तेषु अष्टसु स्वर्णादिषु सुश्रुते तु रसवर्ज्जिताः सप्तैव धातवोऽभिहिताः किन्तु रसनिरूपणे "ततो रस इति प्रोक्तः स च धातुरपि स्मृतः" इत्युक्तेरष्टधातुताऽपि तस्याभियता "अष्टधातुमयप्रतिमानिर्माणे तु रसं विहाय पित्तलस्य ग्रहणम् "आरकूटं तथैव चेति" हेमा० भविष्योक्तेरिति भेदः ।

**अष्टन्** त्रि०ब०व० अश—व्याप्तौ कनिन् तुट् च । (आट) १"संख्याभेदे द्व्येकयोर्द्विवचनैकवचने" पा० निर्द्देशेन संख्यावाचकमात्रस्य संख्यापरत्वनिर्णयात् । २तत्संख्यान्विते च । "अष्टौ तान्यव्रतघ्नानि आपोमूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" स्मृतिः "निन्द्यास्वष्टासु चान्यासु स्त्रियोरात्रिषु वर्जयेत्" मनुः "अष्टानां लोकपालानां वपुर्धारयते नृपः" । "अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत" इति च मनुः । दशविंशतिशब्दयोः परतः समासे आदन्तादेश अष्टादश: । अष्टाविंशतिः त्रिंशदादौ वा अष्टत्रिंशत् अष्टात्रिंशत् अष्ट(ष्टा) चत्वारिंशत् अष्ट(ष्टा) पञ्चाशत् अष्ट(ष्टा)षष्टिः अष्ट(ष्टा)सप्ततिः अष्टाशीतिः अष्ट(ष्टा)नवतिः संख्याव्ययपूर्व्वकात् ततः बहुव्रीहौ डच् । "निरष्टे अश्वशते" शत०ब्रा० सप्ताष्टानि अहानि ।

**अष्टपाद्(द)** पु० अष्टौ पादा अस्य वा अन्त्यलोपः । १शरभे तच्छब्दे तल्लक्षणम् २लूतायाञ्च हेम० ।

**अष्टपदिका** स्त्री अष्टसु दिक्षु पादा अस्याः अन्त्यलोपः ङीपि पद्भावे संज्ञायां कन् ह्रस्वः । (हापरमालि) लतायाम् । कनभावे । अष्टपदीत्यप्यत्र स्त्री ।

**अष्टपल** न० अष्टौ पलानि परमाणमस्य अण् द्विगोर्लुगनपत्ये" पा० तस्य लुक् "जषणत्रिफलाकल्के वज्रमात्रे गुड़ात् पले" । सर्पिषोऽष्टपलं पक्वा मात्रां मन्दानलः पिबेत्" चक्रदत्तोक्ते घृतभेदे" ।

**अष्टपुष्पी** स्त्री अष्टनां पुष्पाणां समाहारः । अनिर्णीत संज्ञकत्वात् द्विगुः । पुष्पाष्टके । "कदाचिद्दुन्यस्ताष्टपुष्पिकापातोत्पादितक्रोधेन" काद० अज्ञाताऽष्टपुष्पीति कन् । तत्रैव ।

**अष्टभुजा** स्त्री अष्टौभुजा अस्याः । देवी माहात्म्यस्य तृतीयचरितदेवतायां महासरस्वत्यां तन्मूर्त्तेर्ध्यानशब्दे विवृतिः ।

**अष्टम** त्रि० अष्टानां पूरणः डट् मट् च । येन अष्टसंख्या पूर्य्यते तस्मिन् । "पैशाचश्चाष्टमोऽधमः" "अष्टमं चायुषः स्थानमष्टमादष्टमं च यत् । तयोरपि व्ययस्थानं मारकस्थानमुच्यते" ज्योतिः परा० "गर्भाष्टमेऽव्दे कुर्व्वीत ब्राह्मणस्योपनायनम्" मनुः स्त्रियां ङीप् । "सौविष्टकृत्यष्टमी" आश्व० स्विष्टकृत संबन्धिनी अष्टमी आहुतिः" कर्क० । सा च चन्द्रस्याष्टमकलाक्रियाकूटाधाररूपे तिथिभेदे" । "चतुर्द्दश्यष्टमी चैव